# Shri Lakshminrisimha Prapatti

# શ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ

## Document Information

Text title : lakShmInRRisiMhaprapattiH 1

File name : lakShmInRRisiMhaprapattiH.itx

Category : vishhnu, krishna, rAmAnujasampradAya, prapatti

Location : doc_vishhnu

Author : HH 44th paTTam MukkUr SrImad azhagiya singar

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 24, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ

શ્રી શ્રીનિવાસાહ્વયયોગિવર્યં નારાયણં યોગિવરં તથૈવ ।
શ્રીયોગિવર્યં રઘુવીરવેદકોટીરસંજ્ઞં ગુરુમાશ્રયામિ ॥ ૧॥

અહોબિલે ગારુડશૈલમધ્યે કૃપાવશાત્કલ્પિતસન્નિધાનમ્ ।
લક્ષ્મ્યા સમાલિઙ્ગિતવામભાગં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૨॥

શ્રીવણ્શઠારાતિયતીન્દ્રમાદ્યં પ્રેમ્ણા સ્વયમ્પ્રેષમનુપ્રદાય । (શ્રીમચ્છઠારાતિ)
સ્વારાધને પ્રેરયતિ સ્મ યસ્તં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૩॥

સર્વસ્ય લોકસ્ય સમીહિતાનાં પ્રદાનદીક્ષાવશતઃ સદૈવ ।
શ્રિયા સમેતં શ્રિતદોષહન્ત્ર્યા લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૪॥

યસ્યાભવદ્ભક્તજનાર્તિહન્તુઃ પિતૃત્વમન્વેષ્વવિચાર્ય તૂર્ણમ્ ।
સ્તમ્ભેઽવતારસ્તમનન્યલભ્યં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૫॥

યમીક્ષિતું દેવગણોઽતિરુષ્ટં શત્રૌ ન શક્નોતિ ચતુર્મુખાદિઃ ।
પ્રસાદિતો ભક્તજનેન યસ્તં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૬॥

વામત્વમદ્ય ત્યજ સંશ્રિતેષુ નાસ્તીહ કશ્ચિત્કિલ નાપરાધી ।
લક્ષ્મ્યેતિ વામાઙ્ગયોચ્યમાનં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૭॥

શ્રીવીરવદ્રાઘવવેદમૌલિં યોગીન્દ્રક્લૃપ્તૈશ્શુભતાપપુણ્ડ્રૈઃ ।
નામાદિભિર્માં યુતમાતનોદ્યસ્તં શ્રીનૃસિંહં શરણં પ્રપદ્યે ॥ ૮॥

શ્રીમદ્રહસ્યત્રયસારપાઠપ્રારમ્ભકાલે તવ સર્વસિદ્ધિઃ ।
સ્યાદિત્યુપશ્રુત્યભિધાયકં મે લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૯॥

ભાસ્યપ્રદાનાવસરે તુ વીરરઘૂદ્વહામ્નાયશિખાર્યરૂપી ।
સ્વપ્નાગતો ભાષ્યમદત્ત યો મે લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૦॥

યઃ શ્રીનિવાસાખ્યમુનીન્દ્રતો માં સમ્પ્રાપ્તવેદાન્તયુગં વ્યતાનીત્ ।
તદર્પિતં સ્વીકૃતમદ્ભરં તં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૧॥

સ્વપ્ને રમાવાસમુનીન્દ્રરૂપી સ્વયં સમાગત્ય મમાપિ દેવઃ ।
ત્રિદણ્ડકાષાયમદાન્મુદા યસ્તં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૨॥

આરાધનં સ્વસ્ય કથં મયેતિ ભીતં સદા પદ્મલતામુખેન ।
આશ્વાસ્ય મામપ્યકરોત્કૃતાર્થં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૩॥

શઠારિનારાયણયોગિવર્યપરાઙ્કુશસ્વામિ પરાઙ્કુશાદ્યૈઃ ।
યઃ પૂજિતઃ શ્રીનિધિયોગિમુખ્યૈર્લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૪॥

નારાયણશ્રીરઘુવીરવેદકોટીરનારાયણરમાનિવાસૈઃ ।
યોગીશ્વરૈરન્વહમર્ચિતો યસ્તં લક્ષ્મીનૃસિંહં શરણં પ્રપદ્યે ॥ ૧૫॥

ત્વદ્દત્તવાચા તવ કિઙ્કરેણ ત્વત્પ્રીતિકામેન મયા કૃતેન ।
સ્તોત્રેણ લક્ષ્મીનૃહરેઃ સ વિષ્ણુઃ પ્રીતો ભવ ત્વં કરુણાર્દ્રદૃષ્ટિઃ ॥ ૧૬॥

પરાઙ્કુશાખ્યેન તપોધનેન લક્ષ્મીનૃસિંહસ્ય કૃતા પ્રપત્તિઃ ।
પાપઠ્યતે યેન ભવેત્સ તસ્ય પૂર્ણં કૃપાપૂર્ણકટાક્ષપાત્રમ્ ॥ ૧૭॥

ઇતિ શ્રીમદ્ભિઃ શ્રીવણશઠકોપ શ્રીવેદાન્તદેશિકયતીન્દ્ર
મહાદેશિકૈરનુગૃહિતા શ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ સમાપ્તા ॥

Composed by HH 44th paTTam MukkUr SrImad azhagiya singar

Proofread by PSA Easwaran

*Shri Lakshminrisimha Prapatti*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*